लग्ने द्विरागमनं लघुध्रुवे चरेऽन्त्यपे मृदुडुनि । दैत्येज्योऽप्यभिमुखदक्षिणे यदि स्यान्नक्षेयुर्न हि शिशुगर्भिणी नवोढाः । बालश्चेत् व्रजति विपद्यते नवोढा चेद्वन्ध्या भवति च गर्भिणी त्वगर्भा । नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः । नृपपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृन्नहि । पितृगृहे चेत् कुचपुष्पसम्भवः स्त्रीणां न दोषः प्रतिशुक्रसम्भवः । भृग्वङ्गिरोवत्सवशिष्ठकश्यपात्रीणां भरद्वाजमुनेः कुले तथा" मु० चि० "पूर्वं नववधूप्रवेशे जाते तदनन्तरं परावृत्यापि पितृगृहप्राप्तायामपि वध्वा यथेष्टवर्षाणि स्थितायाः पुनर्भर्तृगृहप्रवेशो द्विरागमनशब्दवाच्यः । अयंचाचारः प्राच्योदीच्यपाश्चात्यानामेवेति । चरेदिति । अथ वधूप्रवेशकथनानन्तरं पुनर्वधूप्रवेशं द्विरागमनं वक्ष्यमाणनक्षत्रादिषु चरेत् कुर्यात्कदा ? ओजहायने विषमवर्षे प्रथमे तृतीये पञ्चमे वा वर्षे सति । तथा घटालिमेषगे कुम्भवृश्चिकमेषस्थिते रवौ । तथा वरस्य रवीज्यशुद्धिः रवेः सूर्यस्य इज्यस्य गुरोः शुद्धिस्तयोर्योगतः । शुभग्रहस्य सोमबुधगुरुशुक्राणामन्यतमस्य वासरे सति । मिथुनमीनकन्यातुलावृषाणामन्यतमे लग्ने शुभग्रहावलोकिते शुभयुक्ते वा सति । लघून्यश्विनीपुष्यहस्ताः ध्रुवाणि प्रसिद्धानि चराणि श्रवणादित्रयपुनर्वसुस्वात्यः अन्त्यपोरोऽन्त्यमस्तद्वत् मूलं मृदूनि प्रसिद्धानि एषु भेषु द्विरागमः प्रशस्त इत्यर्थः । यदाह रत्नोच्चयः "तिष्यादित्यसमीरणादितिवसुश्रोत्रोत्तराश्विनीरोहिण्यः शुभदाश्च वर्षमसमं मेषालिकुम्भे रविः । कन्यामन्मथमीनमे नववधूयानं वृषे तौलिके देवाचार्यसितेन्दुसौम्यदिवसे शुद्धे गुरौ भास्करे" इति । ग्रन्थकृताऽत्र कानिचिद्भान्यधिकानि उक्तानि तानि राजमार्तण्डेनोक्तानि । "नीहारांशुधनोत्तरादितिगुरुब्राह्मानुराधाश्विनीमूलाहस्करवारुणानिलहरित्वाष्ट्रेषु शस्ते तिथौ । कुम्भाजालिगते रवौ शुभकरे प्राप्तोदये भार्गवे सूर्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे । हित्वा दिक्प्रतिलोमगौ बुधसितौ लालाटगं दिक्पतिं चानीता गुणशालिनी नववधूर्नित्योत्सवैर्मन्दिरम्" । लालाटगान् यात्रायां वक्ष्यति । शुक्रास्तनिषेधस्तु सामान्यतो वाप्यारामेत्यादिनोक्त एवेति न पुनरुक्तः । यद्यपि प्राक् सामान्येन कालशुद्धिरुक्ता तथाप्यावश्यकत्वे । "चैत्रे पौषे हरिस्वप्ने गुरोरस्ते मलिम्लुचे । नवोढागमनं नैव कृते पञ्च-त्वमाप्नुयादिति" बादरायणवाक्याच्चैव वधूप्रवेशः कार्यः । दैत्येज्य इति । यदि दैत्येज्यः शुक्रोऽभिमुखदक्षिणे गन्तव्यदिगभिमुखे गन्तुर्दक्षिणदिग्भागे वा स्थितः स्यात्तदा शिशुर्बालः गर्भिणी गर्भवती नवोढा नूतनपरिणीता व्रजेत्तदा बालः विपद्यते म्रियते । गर्भिणी त्वगर्भा गर्भरहिता स्यात् गर्भस्राववती भवेत् । नूतनपरिणीता नवोढा वन्ध्या अपत्यसम्भवरहिता स्यात् । यदाह बादरायणः "अस्तङ्गते भृगोः पुत्रे तथा सम्मुखमागते । नष्टे जीवे निरंशे वा नैव सञ्चालयेद्वधूः । गर्भिण्या बालकेनापि नववध्वा द्विरागमे । पदमेकं न गन्तव्यं शुक्रे सम्मुखदक्षिणे । गुर्विणी स्रवते गर्भं बालो वा मरणं व्रजेत् । नवा वधूर्भवेद्वन्ध्या शुक्रे सम्मुखदक्षिणे" । यदि शुक्रः पूर्वस्यामुदितस्तदा पूर्वदिशि गन्तुः सम्मुख एव पश्चिमां गन्तुः पृष्ठे, दक्षिणां गन्तुर्वामे, उत्तरां गन्तुर्दक्षिणे स्यात् । तदा पूर्वोत्तरे दिशौ न गच्छेत् किन्तु पश्चिमदक्षिणे दिशौ गच्छेत् । यदि पश्चिमायामुदितः शुक्रः तदा पश्चिमां गन्तुः सम्मुख एव दक्षिणां गन्तुः दक्षिणः । पूर्वां गन्तुः पृष्ठे उत्तरां गन्तुर्वामः । तदा पश्चिमदक्षिणे दिशौ न यायात् । किन्तु पूर्वोत्तरे दिशौ गच्छेत् । "पृष्ठे भृगौ पुत्रवतीं प्रयाणे कान्तां कुलीनां सुभगां करोति । वामे सुखो वै विदधाति शुक्रो वैधव्यशोकौ खलु चास्त शुक्रः" इति । केचिद्दीपोत्सवप्रतिपदि नक्षत्रादिनियमं विनैव वधूप्रवेशं वाञ्छन्ति । उक्तञ्च "अस्तङ्गते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ । दीपोत्सवबलेनैव कन्या भर्तृगृहं विशेत्" इति तदेतच्छिष्टाचारतो ज्ञेयम् । अत्र लग्नशुद्धिमाह बादरायणः "उपचयगते जीवे भृगौ केन्द्रमुपागते । शुद्धे लग्ने शुभाक्रान्ते गन्तव्यं भर्तृमन्दिरम्" नगरप्रवेशे, विषयोदेशः आदिशब्देन ग्रामः । तस्योपद्रवे अन्यराजकृतोपद्रवे सति दुर्भिक्षादिना वोपद्रवे सति । गन्तव्यदिशि प्रतिशुक्रकदोषो नास्ति । करपीडने विवाहोद्देशेन यात्रायां सत्यां विबुधा देवास्तेषां यात्रा नगरकोटयात्रा देवयात्रा तीर्थयात्रा प्रयागादियात्रा तयोः । नृपपीडने नृपाद्राज्ञः सकाशात्पीडायां दण्डादिकृतायां सत्याम् नववधूप्रवेशने नूतनपरिणीतायाः कन्यायाः भर्तृगृहप्रवेशे एतेषामन्यतमभावे सति भार्गवः सम्मुखदोषकृन्नहि । यथाह बादरायणः "स्वभवनपुरप्रवेशे देशानां विभ्रमे तथोद्वाहे ।